Kali Medha Dikshopanishat

अथाह वै देवानां पत्नीं भजते। तस्योपासकोऽन्यां गच्छन् ॐ अथैनां मेधादीक्षारूपिणीं भावयेत्। स शिवो भवेत्। स कालीरूपो भवेत्। सोऽयं मेधास्पर्शमणिकालीं दीक्षयेत्। ततश्चिन्तामणिकालीं दीक्षयेत्। ततः सिद्धिकाल्यधिकारी भवेत्। ततो विद्याराज्ञीं जपेत्। ततः कामकलाकालीं परारूपिणीं जपेत्। ततश्चरणदीक्षारूपिणीं हंसकालीं यजेत्। रक्तशुक्लमिश्रनिर्वाणरूपिणीं यजेत्। सर्वनिर्वाणदीक्षितो भवेत्। ततः शाम्भवीदीक्षितो भवेत्। गुह्यकाल्यधिष्ठितो भवेत्। शिवो भवेत्। स परारूपो भवेत्। परात्पररूपो भवेत्। परात्परातीतरूपो भवेत्। चित्परारूपो भवेत्। चित्परात्परारूपो भवेत्। चित्परात्परातीतरूपो भवेत्। ब्रह्मविष्णुरुद्रेश्वर सदाशिव महाकाल चित्पराम्बारूपो भवेत्। स ब्रह्मत्वं गच्छति। मेधादीक्षां लभेत्। मेधादीक्षातः परा दीक्षा न विद्यत इत्याह भगवान् शिवः। स्पर्शविद्यया देहशुद्धिर्भवेत्। ततश्चिन्तामणिविद्याधिकारी विद्याराज्ञीं लभेत्। विद्याराज्ञ्यधिकारी तु षोढां जपेत्। तुर्याषोढाधिकारी कामकलां जपेत्। कामकलाधिकारी चरणरूपिणीं जपेत्। हंसदीक्षितो भवेत्। चरणाधिकारी षट् शाम्भवसम्पन्नो भवेत्। गुह्यकाल्यधिष्ठितो भवेत्। ततो मेधां चरेत्। जीवको हि भृङ्गत्वं गच्छति। भृङ्गीभूत्वा षट् चक्राणि निर्भिन्द्यात्। ततः परागभुग्भवेत्। परकायप्रवेशवान् वयस्स्थैर्यं चरेत्। कामरूपत्वं गच्छति। षट् सिद्धीश्वरो भवेदिति शिवप्रोक्तं वेद॥

॥ इत्याथर्वणे सौभाग्यकाण्डे काली मेधादीक्षोपनिषत् समाप्ता ॥

athāha vai devānāṃ patnīṃ bhajate | tasyopāsako.anyāṃ gacchan OM athaināṃ medhādīkṣārūpiṇīṃ bhāvayet | sa śivo bhavet | sa kālīrūpo bhavet | so.ayaṃ medhāsparśamaṇikālīṃ dīkṣayet | tataścintāmaṇikālīṃ dīkṣayet | tataḥ siddhikālyadhikārī bhavet | tato vidyārājnīṃ japet | tataḥ kāmakalākālīṃ parārūpiṇīṃ japet | tataścaraṇadīkṣārūpiṇīṃ haṃsakālīṃ yajet | raktaśuklamiśranirvāṇarūpiṇīṃ yajet | sarvanirvāṇadīkṣito bhavet | tataḥ śāmbhavīdīkṣito bhavet | guhyakālyadhiṣṭhito bhavet | śivo bhavet | sa parārūpo bhavet | parātpararūpo bhavet | parātparātītarūpo bhavet | citparārūpo bhavet | citparātparārūpo bhavet | citparātparātītarūpo bhavet | brahmaviṣṇurudreśvara sadāśiva mahākāla citparāmbārūpo bhavet | sa brahmatvaṃ gacchati | medhādīkṣāṃ labhet | medhādīkṣātaḥ parā dīkṣā na vidyata ityāha bhagavān śivaḥ | sparśavidyayā dehaśuddhirbhavet | tataścintāmaṇividyādhikārī vidyārājnīṃ labhet | vidyārājnyadhikārī tu ṣoḍhāṃ japet | turyāṣoḍhādhikārī kāmakalāṃ japet | kāmakalādhikārī caraṇarūpiṇīṃ japet | haṃsadīkṣito bhavet | caraṇādhikārī ṣaṭ śāmbhavasampanno bhavet | guhyakālyadhiṣṭhito bhavet | tato medhāṃ caret | jīvako hi bhṛṅgatvaṃ gacchati | bhṛṅgībhūtvā ṣaṭ cakrāṇi nirbhindyāt | tataḥ parāgabhugbhavet | parakāyapraveśavān vayassthairyaṃ caret | kāmarūpatvaṃ gacchati | ṣaṭ siddhīśvaro bhavediti śivaproktaṃ veda ||

ityātharvaṇe saubhāgyakāṇḍe kālīmedhādīkṣopaniṣat samāptā

www.kamakotimandali.com